कुक्कुटे। कुक्कुशब्दं भाषते भाष—बा० ड। २कुक्कुटे पक्षिणि। (पातुकुका) इति ख्याते ३पक्षिभेदे अमरः।

**कुक्कुर** पुंस्त्री कोकते क्विप् कुरति शब्दायते कुर—शब्दे क कर्म्म०। १स्वनामख्याते पशौ। तच्छुभाशुभलक्षणमुक्तं वृ०सं० यथा "पादाः पञ्चनखास्त्रयाग्रचरणः षड्भिर्नखैर्दक्षिण-स्ताम्रोष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति च। लाङ्गूलं ससटं दृगृक्षसदृशी कर्णौ च लम्बौ मृदू यस्य स्यात् स करोति पोष्टुरचिरात् पुष्टां श्रियं श्वा गृहे। पादेपादे पञ्च पञ्चाग्रपादे वामे यस्याः षण्णखा मल्लिकाक्षाः। वक्रं पुच्छं पिङ्गलालम्बकर्णा या सा राष्ट्रं कुक्कुरी पाति पोष्टुः"। स्त्रियां जातित्वात् ङीष्।

कुकुरगुणाश्चाणक्येनोक्ताः यथा "बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च षडेते च शुनो-गुणाः"। २ग्रन्थिपर्णीवृक्षे न० शब्दचि०।

**कुक्कुरद्रु** पु० कुक्कुरस्तद्गन्धयुक्तोद्रुर्वृक्षः। (कुकुरसोङ्गा) वृक्षभेदे "कुक्कुरद्रुः कटुस्तिक्तो ज्वररक्तकफापहः। तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत्" भावप्र०।

**कुक्कुरवाच्** पु०कुक्कुरस्येव वागस्य। सारङ्गमृगे राजनि०

**कुक्ष** पु० कुष—क्स। जठरे उज्ज्वलदत्तः।

**कुक्षि** पु० कुष—क्सि। १उदरे "विपुलेन सागरशयस्य कुक्षिणा" माघः "कुम्भीनस्याश्च कुक्षिजः" रघुः। "तव कुक्षौ म-हाभागे!। अचिरात् संजनिष्यते" रामा०। २उदरस्य वामदक्षिणपार्श्वयोः (कोँक) अमरः। ३मध्यभागे "ततः सागरमासाद्य कुक्षौ तस्य महोर्म्मिणः" भा०व०७६अ०। कुक्षौ भवः अण्। कौक्ष उदरभवे मध्यभवे च त्रि०स्त्रियां ङीप्। कुक्षौ बद्धोऽसिः ढकञ्। कौक्षेयकोऽसिः। कुक्षिदेशे भवः भूमा० वुञ्। कौक्षक मध्यदेशभवे त्रि०।

**कुक्षिम्भरि** त्रि० कुक्षिं बिभर्त्ति भृ—खि—मुम् च। देवातिथि-वञ्चनेनात्मोदरमात्रपूरके क्रपणे।

**कुक्षिरन्ध्र** पु० कुक्षौ मध्यभागे रन्ध्रं छिद्रं यस्य नले रायमु०।

**कुक्षिशूल** न० कुक्षौ शूलः। सुश्रुतोक्ते शूलरोगभेदे "प्रकु-प्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः। तदास्य भोजनं भुक्तं सोपष्टम्भं न पच्यते। उच्छ्वसित्याशु शक्तता शूले-नाहन्यते मुहुः। नैवासने न शयने तिष्ठन् लभते सुखम्। कुक्षिशूल इति ख्यातोवातादामसमुद्भवः" सुश्रु०। तस्य क्लीवत्वमपि "हृत्कुक्षिशूलं मुखकण्ठशोषः" सुश्रुतः

**कुङ्कुम** न० कुक्यते आदीयते कुक—आदाने—उमक् नि० मुम्। काश्मीरादिदेशजे स्वनामख्याते १गन्धद्रव्यभेदे। देशभेद-विशेषजातस्य तस्य लक्षणादि भावप्रकाशे दर्शितं यथा—"काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत्। सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्। वाह्लीकदे-शसंजातं कुङ्कुमं पाण्डुरम्मतम्। केतकीगन्धयुक्तं-तन्मध्यमं सूक्ष्मकेशरम्। कुङ्कुमं पारसीके यन्मधुगन्धि तदीरितम्। ईषत्पाण्डुरवर्णं यदधमं स्थूलकेशरम्। कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित्। तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम्" [तभेदे

**कुङ्कुमाद्रि** पु० कुङ्कुमस्याकरोऽद्रिः। काश्मीरदेशस्थे पर्व्व-

**कुङ्कुमी** स्त्री कुङ्कुमवर्णोऽस्त्यस्याः अच् गौरा०ङीष्। महाज्योति-ष्मतीलतायाम् राजनि०। पृषो०कुङ्कुनीति पाठान्तरम् तत्रैवार्थे

**कुच** रोधे, सम्पर्के लेखने च सक० कौटिल्ये अक० तु०पर०सेट् कुटादि। कुचति अकुचीत् चुकोच कुचः। प्रनिकुचति

**कुच** पु० कुच—कर्त्तरि क। स्तने। स्त्रीणां कुचवृद्धिर्यौवने यथाह सुश्रुतः"स्त्रीणां तु विंशतिरधिका दश तासां स्त-नयोरेकैकस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः" इति विवृतञ्चैतत् भावप्र० यथा—

"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते। तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च। व्याख्यानं यथा पुंसां रोमराजीश्मश्रुप्रभृतयः नारीणान्तु रोमराजीस्तनार्त्तवप्रभृतयः"।

"यावन्नोतद्भिद्येते स्तनौ तावद्देया" इति स्मृतौ कुचोद्भे-दकालात् पूर्व्वं दानं विहितम्। स च कालः द्वादशव-र्षादिः, "स तदृचकुचौ भवन् प्रभाभरचक्रभ्रममातनो-ति यत्" नैष० "सकठिनकुचचूचुकप्रणोदम्" "नत्युन्नतत्वात् कुचमण्डलेन" "कौसुम्भं पृथुकुचकुम्भ-सङ्गिवासः" माघः "तन्वि! तव कुचावेतौ नियतं चक्र-वर्त्तिनौ" उद्भटः "पितुर्गृहे चेत् कुचपुष्पसम्भवः" ज्यो० २सङ्कुचिते त्रि०

**कुचण्डी** स्त्रीकुत्सिता चण्डी विकारकारित्वात् कोपनेव। मू-र्व्वालतायाम् शब्दचि०। स्वार्थे क। कुचण्डिका तत्रैव।

**कुचतट** त्रि० कुचस्तटमिव विशालत्वात्। विशाले१कुचे ६त०। २कुचैकदेशे च।

**कुचन्दन** न० कुत्सितं गन्धहीनत्वात् चन्दनम्। (वक्कमकाठ) १काष्ठभेदे मेदि० २रक्तचन्दने अमरः। इदं सुश्रुते पटो-लादिगणे सालसारादिगणे चोक्तम् तत्तच्छब्दे विवृतिः